क्रोञ्चदारणः, पुं, (क्रुञ्च + अच् बाहुलकाद्गुणः। क्रोञ्चः पर्व्वतविशेषः। तस्य दारणः दारक इत्यर्थः। क्रोञ्चं दारयति वा। दॄ + णिच् + ल्युः।) कार्त्तिकेयः। इत्यमरटीकायां रायमुकुटः॥

क्रोड़ं, क्ली, स्त्री, (क्रुड़ + घञ्।) बाह्वोर्मध्यम्। कोल इति भाषा। तत्पर्य्यायः। भुजान्तरम् २ उरः ३ वत्सम् ४ वक्षः ५। इत्यमरः।२।६।७७॥ उत्सङ्गः ६ भोगः ७ वपुषःप्राक् ८। इति राजनिर्घण्टः॥ (यथा, यजुर्व्वेदे।२५।८। "इन्द्रस्य क्रोड़ोऽदित्यै-पाजस्यम्"। कात्यायनश्रौतसूत्रे च।६।८।१३। "शेषमिड़ा पात्र्यामासिच्य क्रोड़मनस्थीनि च पास्यति"॥ हितोपदेशे च।
"तत्र तरोर्निर्म्मितनीड़क्रोड़े पक्षिणः सुखं वर्षासु निवसन्ति"॥)

क्रोड़ः, पुं, (क्रुड़ + घञ्। क्रोड़ोऽस्यास्तीति अर्श आदिभ्यः अच् वा।) शूकरः। इत्यमरः।२।५।२॥ शनिः। इति मेदिनी॥ वाराहीकन्दः। इति राजनिर्घण्टः॥ (यथा, महाभारते।१३।५०।२०।
"नदीशैवालदिग्धाङ्गं हरिश्मश्रुजटाधरम्।
मत्स्यैः शङ्खगणैर्गात्रैः क्रोड़ैश्चित्रैरिवार्पितम्"॥)

क्रोड़कन्या, स्त्री, (क्रोड़स्य शूकरस्य कन्या इव।) वाराहीकन्दः। इति राजनिर्घण्टः॥

क्रोड़चूड़ा, स्त्री, (क्रोड़े चूड़ा यस्याः।) महाश्रावणिकावृक्षः। इति राजनिर्घण्टः॥ वड़ थुलकुड़ि इति भाषा।

क्रोड़पर्णी, स्त्री, (क्रोड़े कण्टकमध्ये पर्णं यस्याः।) कण्टकारिका। इति शब्दचन्द्रिका॥ (कण्टकारीशब्दे विवरणमस्य ज्ञेयम्॥)

क्रोड़पादः, पुं, (क्रोड़े शरीराभ्यन्तरे पादोऽस्य।) कच्छपः। इति हेमचन्द्रः॥

क्रोड़ाङ्गः, पुं, (क्रोड़े अङ्गानि अस्य।) कच्छपः। इति शब्दरत्नावली॥

क्रोड़ाङ्घ्रिः, पुं, (क्रोड़े अङ्घ्रिरस्य।) कच्छपः। इति त्रिकाण्डशेषः॥

क्रोड़ी,स्त्री, (क्रोड़ + जातिवाचकत्वात् गौरादित्वात् ङीष्।) वाराहीकन्दः। इति राजनिर्घण्टः॥

क्रोड़ीकरणं, क्ली, (क्रोड़ + कृ + भावे ल्युट्। अभूततद्भावे च्विः।) आलिङ्गनम्। इति हलायुधः॥

क्रोड़ीकृतिः,स्त्री, (क्रोड़ + कृ + भावे + क्तिन्। अभूततद्भावे च्विः।) आलिङ्गनम्। इति हेमचन्द्रः॥

क्रोड़ीमुखः, पुं, (क्रोड्याः शूकर्य्याः मुखमिव मुखं अस्य।) गण्डकः। गण्डारः। इति राजनिर्घण्टः॥ गण्डार इति भाषा।

क्रोड़ेष्टा, स्त्री, (क्रोड़स्य शूकरस्य इष्टा प्रिया।) मुस्ता इति राजनिर्घण्टः॥

क्रोथः, पुं, (क्रुथ् हिंसने + भावे घञ्।) हननम्। इति हेमचन्द्रः॥

क्रोधः, पुं, (क्रुध् + भावे घञ्।) प्रतिकूले सति तैक्ष्ण्यस्य प्रबोधः। (यथा, भगवद्गीतायाम्।३.अ०
"काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्"॥)
तत्पर्य्यायः। कोपः २ अमर्षः ३ रोषः ४ प्रतिघः ५ रुट् ६ क्रुत् ७ क्रुद् ८। इत्यमरः।१।७।२६॥ आमर्षः ६ इति तट्टीकासारसुन्दरी॥ भीमः १० क्रुधा ११ रुषा १२। इति शब्दार्णवः॥ स तु ब्रह्मणो भ्रुवो जातः शरीरस्थषड्रिपोरन्तर्गतश्च। इति पुराणम्॥ हेलः १ हरः २ हृणिः ३ त्यजः ४ भामः ५ एहः ६ ह्वरः ७ तपुषी ८ जूर्णिः ९ मन्युः १० व्यथिः ११। इत्येकादश क्रोधनामानि। इति वेदनिघण्टौ २ अध्यायः॥ (वत्सरभेदः। यथा,
"विषमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम्।
जनानां जायते भद्रे! क्रोधे क्रोधः परस्परम्"॥
इति शब्दार्थचिन्तामणिः। स्त्रियां टाप्। दक्षकन्याविशेषः। यथा, महाभारते १।६५।१२।
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः"॥)

क्रोधजः, पुं, (क्रोधात् जायते। जन् + डः।) मोहः। यथा, भगवद्गीतायाम्।२।६२।
"सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते।
क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः"॥
द्विधाव्यसनगणान्तर्गतव्यसनगणः। यथा, मनुः।
"पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः"॥

क्रोधनः, त्रि, (क्रुध् + "क्रुधमण्डार्थेभ्यश्च"।३।२।१५१। इति युच्।) क्रोधविशिष्टः। तत्पर्य्यायः। अमर्षणः २ कोपी ३। इत्यमरः।३।१।३२॥ क्रोधी ४ रोषणः ५। इति हेमचन्द्रः॥ (यथा, वेणीसंहारे तृतीयाङ्के।
"यद्रामेण कृतं तदेव कुरुते द्रौणायणिः क्रोधनः"॥
कुरुवंशीयनृपविशेषः।
यथा, भागवते।९।२२।११।
"ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च"॥
षष्टिवर्षान्तर्गतोनषष्टितमवर्षभेदः। यथा तन्त्रे।
"रोगो मरणदुर्भिक्षं विरोधोत्तरसङ्कुलम्।
क्रोधने विषमं सर्व्वं समाख्यातं हरप्रिये!"॥
भैरवभेदः। यदुक्तं तन्त्रे।
"असिताङ्गो रुरुश्चण्ड उन्मत्तः क्रोधनस्तथा"॥)

क्रोधना, स्त्री, (क्रुध् + युच् + स्त्रियां टाप्।) कोपवती। तत्पर्य्यायः। भामिनी २ चण्डी ३। इति त्रिकाण्डशेषः॥ (यथा, रामायणे।२।७८।१०।
"आत्मकामा सदा चण्डी क्रोधना प्राज्ञमानिनी"॥)

क्रोधमूर्च्छितः, पुं, (क्रोधः क्रोधमय इव मूर्च्छितः।) चोरनामगन्धद्रव्यम्। इति शब्दरत्नावली॥ (क्रोधेन मूर्च्छितः।) अतिकोपने त्रि॥ (यथा, रामायणे।१।१।४९।
"रक्षसां निहतान्यासन् सहस्राणि चतुर्द्दश।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः"॥)

क्रोधी, [न्] त्रि, (क्रोधोऽस्यास्तीति इनिः। यद्वा, क्रुध्यति इति। क्रुध् + णिनिः।) क्रोधयुक्तः इति हेमचन्द्रः॥ महिषः। इति राजनिर्घण्टः॥ (यथा सुश्रुते। "तत्र जागरूकः शीतद्वेषी दुर्भगस्तेनो मत्सर्य्यनार्य्यो गान्धर्व्वचित्तः स्फुटितकरचरणोऽतिरूक्षश्मश्रुनखकेशः क्रोधी दन्तनखखादी च"॥)

क्रोशः, पुं, (क्रोशति यतः। क्रुश् + अपादाने घञ्।) सहस्रधनुः। चतुःसहस्रहस्तपरिमाणम्। कोश इति भाषा। तत्पर्य्यायः। गव्यूतम् २। इति हेमचन्द्रः॥ (यथा, रघुवंशे।१३।७९।
"क्रोशार्द्धं प्रकृतिपुरःसरेण गत्वा
काकुत्स्थः स्तिमितजवेन पुष्पकेण"॥)
द्विसहस्रदण्डः। अष्टसहस्रपरिमाणम्। इति लीलावती॥ मुहूर्त्तः। यथा,—
"दशदण्डे तु या पूजा तत्सर्व्वमक्षयं भवेत्।
षष्ठक्रोशे महेशानि तत्! सर्व्वममृतोपमम्॥
सप्तमक्रोशके देवि! सर्व्वं क्षीरोपमं भवेत्।
अष्टमक्रोशके देवि! द्रव्यतुल्यं न संशयः॥
अतः परं महेशानि! विषतुल्यं न संशयः"।
इति गुप्तसाधनतन्त्रे षष्ठः पटलः॥ क्रुश् + भावे घञ्। रोदनम्। आह्वानम्॥)

क्रोशतालः, पुं, (क्रोशं व्याप्य तालः शब्दभेदः यस्य।) ढक्का। इति हारावली॥

क्रोशध्वनिः, पुं, (क्रोशं व्याप्य ध्वनिरस्य।) ढक्का। इति हारावली॥

क्रोशयुगं, क्ली, (क्रोशस्य क्रोशपरिमिताध्वनो युगं युग्मम्।) क्रोशद्वयम्। तत्पर्य्यायः। गव्यूतिः २। इत्यमरः॥ गोरुतम् ३ गव्या ४ गव्युतम् ५। इति हेमचन्द्रः॥

क्रोष्टा, [ष्टु] पुं, स्त्री, (क्रोशति रौतीति। क्रुश् + "सितनिगमिमसीति"। उणां १।७०। इति तुन्। "तृज्वत् क्रोष्टुः"।७।१।९५। इति तृज्वत्।) शृगालः इत्यमरः।२।१।१८॥ (यथा, महाभारते-१।२१४।८।
"ब्राह्मणस्य प्रशान्तस्य हविर्धाङ्क्षैः प्रलुप्यते।
शार्द्दूलस्य गुहां शून्यां नीचः क्रोष्टाभिमर्द्दति"॥
यदुवंशीयो राजविशेषः। यथा, हरिवंशे ३३।६१
"क्रोष्टोस्तु शृणु राजेन्द्र! वंशमुत्तमपौरुषम्।
यदोर्वंशधरस्याथ यज्वनः पुण्यकर्म्मणः॥
क्रोष्टोर्हि वंशं श्रुत्वेमं सर्व्वपापैः प्रमुच्यते"॥)

क्रोष्टुकपुच्छिका, स्त्री, (क्रोष्टुकस्य शृगालस्य पुच्छमिव अस्त्यस्याः। ठन् टाप।) पृश्निपर्णी। चाकुलिया इति भाषा। रामवासक इति ख्याता। इति केचित्। इत्यमरटीकायां स्वामी॥ गोलोमिका। इति राजनिर्घण्टः॥

क्रोष्टुकमेखला,स्त्री,(क्रोष्टुकस्येव मेखला कट्यधःपश्चाद्भागो वा अस्त्यस्याः "अर्शआदिभ्यः"।५।२।१२७। इति अच् टाप्।) पृश्निपर्णी। इति रत्नमाला॥

क्रोष्टुपुच्छिका, स्त्री, (क्रोष्टोः शृगालस्य पुच्छमिव अस्त्यस्याः। ठन् टाप् अत इत्वं च।) पृश्निपर्णी। इति रत्नमाला॥

क्रोष्टुपुच्छी, स्त्री, (क्रोष्टोः पुच्छमिव अस्त्यस्याः इति "अर्शआदिभ्यः"।५।२।१२७। इति अच् ङीष्।) पृश्निपर्णी। इति शब्दरत्नावली॥

क्रोष्टुफलः, पुं, (क्रोष्टोः प्रियं फलं अस्य अस्मिन् वा।) इङ्गुदीवृक्षः। इति राजनिर्घण्टः॥

क्रोष्टुविन्ना, स्त्री, (क्रोष्टुभिः विन्ना ज्ञाता वा लब्धा इव।) पृश्निपर्णी। इत्यमरः।२।४।९३॥ चिरालक्राञ्चि इति ख्याता इति केचित्। इति भरतः॥ (अस्याः पर्य्यायाः। यथा,—